# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-३ ( Sem_6 )** **प्रश्नपत्र-६** **गुणाः - ७०**

**विषयः - पौरोहित्यम्** (Old_Syllabus) **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २३-०४-२०१६** **सन्दर्भग्रन्थः - छान्दोग्यब्राह्मणम्**

---

### युनिट-१

**प्रश्नः -१ निम्नाङ्कितेषु कयोश्चित् द्वयोः ससन्दर्भ व्याख्या विधेया ।** ०८

*(१) देव सवितः प्रसुव यज्ञं प्रसुवयज्ञपतिं भगाय ।*
*दिव्योगन्धर्वः केतपूः केतं न पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥*

*(२) इममश्मानमारोहाश्मेव त्वं स्थिरा भव ।*
*द्विषन्तमपबाधस्व मा च त्वं द्विषतामधः ॥*

*(३) लेखा सन्धिषु पक्ष्मस्वावर्तेषु च यानि ते ।*
*तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥*

**प्रश्नः -२ छान्दोग्यब्राह्मणस्य प्रथमप्रपाठकस्य प्रथमखण्डे कन्यायाः रक्षार्थं अग्नेः स्तुतेः वर्णनं कुरुत ।** ०८

*अथवा*

**प्रथमखण्डे कन्यायाः विवाहसंस्कारकर्मणि केषां देवानां नामानि सन्ति एवं केभ्यः देवेभ्यः आहुतिः प्रदीयते ? ग्रन्थानुसारं वर्णयत ।**

**प्रश्नः -३ कयोश्चिद् द्वयोः टिप्पणी कार्या ।** ०४

*(१) लाजाहोमविनियुक्तइष्टप्रार्थनां लिखतु ।*

*(२) 'सप्तपदानि' कानि वचनानि विलिख्य व्याख्या कार्या ।*

*(३) सौभाग्याशीर्वादवाक्यानि ग्रन्थोक्तरीत्या व्याख्यायताम् ।*

**प्रश्नः -४ अधोलिखितेषु पञ्चानामुत्तरं लिखत ।** ०५

*(१) अघोरचक्षुः इत्युक्ते किमर्थं भवति ?* *(२) इन्द्रः वधुं प्रति किं किं कथयति ?*

*(३) बृहस्पतिः कयोः नियोजनं करोति ?* *(४) कन्यायाः केशेषु कानि पापानि सन्ति ?*

*(५) पूर्णाहुतिहोमे कानि अपलक्षणानि नष्टानि भवन्ति ?*

*(६) ध्रुवदर्शनेन को लाभः ?* *(७) अग्निप्रदक्षिणं किमर्थं भवति ?*

### युनिट-२

**प्रश्नः -५ निम्नाङ्कितेषु कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

*(१) अग्ने व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमितच्छकेयम् ।*
*ते नर्घ्या समिदमहमनृतात् सत्यमुपैमि स्वाहा ।*

*(२) यदपां घोरं यदपां क्रूरं यदपामशान्तमति तत् सृजामि ॥*

*(३) इमा मधुमतीर्मह्यमनष्टाः पयसासह ।*

*गाव आज्यस्य मातरा इहेमाः सन्तुभूयसीः ॥*

**प्रश्नः -६ उपनयनकर्मणि आचार्यमाणवकयोः सम्वादं यथाशास्त्रं वर्णयतु । ०८**

**अथवा**

**उपनयनसंस्कारे आचार्यस्य योगदानं लिखतु ।**

**प्रश्नः -७ द्वयोः टिप्पणी कार्या । ०४**

*(१) महाव्याहुतिं विलिख्य तस्य महत्त्वं लिखतु ।*

*(२) माणवकेन कृतं दण्डस्तुतिं वर्णयतु ।*

*(३) माणवकः कुत्र कथं कयारीत्या कस्मिन जले स्नानं करोति ?*

**प्रश्नः -८ अधोलिखितेषु पञ्चानां लघूत्तरं लिखत । ०५**

*(१) आदित्यस्य वर्णः कः ?*

*(२) दण्डस्य केन देवेन सम्बन्धः ? किदृशं रूपं दण्डस्य ?*

*(३) माणवकं के देवाः रक्षन्ति ?*

*(४) पशुवृद्धिकामार्थं किदृशं वर्णनमस्ति ?*

*(५) मालायाः किदृशं स्वरूपम् ?*

*(६) संसारस्य नेत्ररूपः कः देवः ?*

*(७) माणवकस्य स्नानसमये कः अग्निः ?*

**युनिट-३**

**प्रश्नः -९ कयोश्चित् द्वयोः ससन्दर्भ व्याख्या कार्या । ०८**

*(१) नमः पृथिव्यै दंष्ट्राय विश्वंमृन्मा ते अन्तेरिषाम् ।*

*सहतं मा विवधीर्विहतं माऽभि संवधीः ॥*

*(२) प्रथमा हव्युवास सा धेनुरभवद यमे ।*

*सा नः पयस्वती दुहा उत्तरामुत्तरां समाम् ॥*

*(३) अमीमदन्त पितरो यथाभागमावृषायिषत ॥*

**प्रश्नः -१० द्वयो सूत्रयोः व्याख्या कार्या । ०८**

*(१) गृहान्नः पितरो दत्त ॥* *(२) नमो वः पितरो घोराय नमो वः पितरो रसाय ।*

*(३) ग्रन्थानुसारं पितृस्तुतिवर्णनम् ।*

**प्रश्नः -११ कस्यचिदेकस्य टिप्पणी कार्या । ०२**

*(१) जातवेद अग्नेः स्तुतिः ।* *(२) रुद्ररूपाग्नेः ग्रन्थोक्तानुसारं वर्णनं कुरु ।*

**प्रश्नः -१२ कयोश्चिद् द्वयोः लघूत्तरं लिखत । ०२**

*(१) अक्षयकामनार्थं कस्य स्तुतिः कृता ? (२) पवित्रे स्थो वैष्णव्यौ व्याख्याताम् ।*

*(३) छान्दोग्यब्राह्मणस्य सम्बन्धः केन वेदेन सह वर्तते ?*

*(४) ग्रन्थस्यभाष्यकारः कः ?*

--------------------